## ओक उचः के। (६४/२८८०)

उचेर्धातोः के प्रत्यये[1] ओकः इति निपात्यते। किं [2]पुनरत्र निपात्यते? कुत्वं गुणश्च। न्योकः शकुन्तः। न्योको गृहम्। कर्तरि इगुपधलक्षणः कः प्रत्ययः। अधिकरणादौ तु कारकान्तरे 'घञर्थे कविधानम्' (वा. ३०६) इति। किमर्थं पुनरयं घञ्येव न व्युत्पाद्यते? स्वरार्थमन्तोदात्तोऽयम् इष्यते, घञि सति आद्युदात्तः स्यात्। दिवौकसः, जलौकसः इत्येवमादावप्यसुनि प्रत्यये 'उणादयो बहुलम्' (३.३.१/३१६९) इति कुत्वं द्रष्टव्यम्॥

## ण्य आवश्यके। (६५/२८८१)

ण्ये परतः आवश्यकेऽर्थे कवर्गो न भवति। अवश्यपाच्यम्। अवश्यवाच्यम्। अवश्यरेच्यम्। आवश्यके इति किम्? पाक्यम्। वाक्यम्। रेक्यम्॥

## यजयाचरुचप्रवचर्चेश्च। (६६/२८८२)

यज याच रुच प्रवच ऋच इत्येतेषां ण्ये[3] परतः कवर्गादेशो न भवति। यज – याज्यम्। याच – याच्यम्। रुच – रोच्यम्। प्रवच – प्रवाच्यम्। ऋच – अर्च्यम्। ऋदुपधादपि ऋचेरत एव निपातनात् ण्यत् भवति। प्रवचग्रहणं शब्दसञ्ज्ञार्थम्। प्रवाच्यो [4]नाम पाठविशेषोपलक्षितो ग्रन्थोऽस्ति। अपरे पुनराहुः, उपसर्गपूर्वस्य नियमार्थम्, प्रपूर्वस्यैव वचेरशब्दसञ्ज्ञायां कुत्वप्रतिषेधो यथा स्यात्, अन्योपसर्गपूर्वस्य मा भूत् इति (म.भा. ३.३३२)। अविवाक्यमहः इति पठन्ति। एतत् तु विशेष एवेष्यते, दशरात्रस्य यद् दशममहः। अन्यत्र अविवाच्यमेव भवति।

[८६१] ण्यति प्रतिषेधे त्यजेरुपसङ्ख्यानम्। (म. भा. ३.३३२)

त्याज्यम्॥

## वचोऽशब्दसञ्ज्ञायाम्। (६७/२८८३)

वचोऽशब्दसञ्ज्ञायां [5]ण्यति परतः कुत्वं न भवति। वाच्यमाह। अवाच्यमाह। अशब्दसञ्ज्ञायाम् इति किम्? अवघुषितं वाक्यमाह॥

## प्रयोज्यनियोज्यौ शक्यार्थे। (६८/२८८४)

प्रयोज्य नियोज्य इत्येतौ [6]शब्दौ [7]शक्यार्थे निपात्येते। शक्यः प्रयोक्तुम् प्रयोज्यः। शक्यो नियोक्तुम् नियोज्यः। शक्यार्थे इति किम्? प्रयोग्यः। नियोग्यः॥

---

1. परतः इत्यधिकम् क, अके प्रत्यये ह. 2. अत्र नास्ति क. 3. प्रत्यये इत्यधिकम् इ. 4. नाम नास्ति क. 5. ण्ये प्रत्यये परतः क. 6. शब्दौ नास्ति ब. इ. 7. ण्ये प्रत्यये परतः इत्यधिकम् क, ण्ये शक्यार्थेऽभिधेये ह.